# अथ जलभेदः।

श्रीकृष्णाय नमः।

नमस्कृत्य हरिं वक्ष्ये तद्गुणानांविभेदकान्।
भावान्विंशतिधा भिन्नान्सर्वसंदेहवारकान् ॥ १ ॥
गुणभेदास्तु तावंतो यावंतो हि जले मताः।
गायकाः कूपसंकाशा गंधर्वा इति विश्रुताः ॥ २ ॥
कूपभेदास्तु यावंतस्तावंतस्तेऽपि संमताः।
कुल्याः पौराणिकाः प्रोक्ताः पारंपर्ययुता भुवि ॥ ३ ॥
क्षेत्रप्रविष्टास्ते चापि संसारोत्पत्तिहेतवः।
वेश्यादिसहिता मत्ता गायका गर्तसंज्ञिताः ॥ ४ ॥
जलार्थमेव गर्तास्तु नीचा गानोपजीविनः।
ह्रदास्तु पंडिताः प्रोक्ता भगवच्छास्त्रतत्पराः ॥ ५ ॥
संदेहवारकास्तत्र सूदा गंभीरमानसाः।
सरःकमलसंपूर्णाः प्रेमयुक्तास्तथा बुधाः ॥ ६ ॥
अल्पश्रुताः प्रेमयुक्ता वेशंताः परिकीर्तिताः।
कर्मशुद्धाः पल्वलानि तथाल्पश्रुतिभक्तयः ॥ ७ ॥
योगध्यानादिसंयुक्ता गुणा वर्ष्याः प्रकीर्तिताः।
तपोज्ञानादिभावेन स्वेदजास्तु प्रकीर्तिताः ॥ ८ ॥
अलौकिकेन ज्ञानेन ये तु प्रोक्ता हरेर्गुणाः।
कादाचित्काः शब्दगम्याःपतच्छब्दाः प्रकीर्तिताः॥९॥

देवाद्युपासनोद्भूताः पृष्ठा भूमेरिवोद्गताः ।
साधनादिप्रकारेण नवधा भक्तिमार्गतः ॥१०॥
प्रेमपूर्त्या स्फुरद्धर्माः स्यंदमानाः प्रकीर्तिताः ।
यादृशास्तादृशाः प्रोक्ता वृद्धिक्षयविवर्जिताः ॥११॥
स्थावरास्ते समाख्याता मर्यादैकप्रतिष्ठिताः ।
अनेकजन्मसंसिद्धा जन्मप्रभृति सर्वदा ॥१२॥
संगादिगुणदोषाभ्यां वृद्धिक्षययुता भुवि ।
निरंतरोद्गमयुता नद्यस्ते परिकीर्तिताः ॥१३॥
एतादृशाः स्वतंत्राश्चेत्सिंधवः परिकीर्तिताः ।
पूर्णा भगवदीया ये शेषव्यासाग्निमारुताः ॥१४॥
जडनारदमैत्राद्यास्ते समुद्राः प्रकीर्तिताः ।
लोकवेदगुणैर्मिश्रभावेनैके हरेर्गुणान् ॥१५॥
वर्णयंति समुद्रास्ते क्षाराद्याः षट् प्रकीर्तिताः ।
गुणातीततया शुद्धान्सच्चिदानंदरूपिणः ॥१६॥
सर्वानेव गुणान्विष्णोर्वर्णयंति विचक्षणाः ।
तेऽमृतोदाः समाख्यातास्तद्वाक्पानं सुदुर्लभम् ॥१७॥
तादृशानां क्वचिद्वाक्यं दूतानामिव वर्णितम् ।
अजामिलाकर्णनवद्बिंदुपानं प्रकीर्तितम् ॥१८॥
रागज्ञानादिभावनां सर्वथा नाशनं यदा ।
तदा लेहनमित्युक्तं स्वानंदोद्गमकारणम् ॥१९॥

उद्धृतोदकवत्सर्वे पतितोदकवत्तथा।
उक्तातिरिक्तवाक्यानि फलं चापि तथा ततः ॥२०॥
इति जीवेंद्रियगता नानाभावं गता भुवि।
रूपतः फलतश्चैव गुणा विष्णोर्निरूपिता: ॥२१॥

इति श्रीवल्लभाचार्यविरचितो जलभेदः समाप्तः।

# अथ पंचपद्यानि।

श्रीकृष्णाय नमः

श्रीकृष्णरसविक्षिप्तमानसा रतिवर्जिताः।
अनिर्वृता लोकवेदे ते मुख्याः श्रवणोत्सुकाः ॥ १ ॥
विक्लिन्नमनसो ये तु भगवत्स्मृतिविह्वलाः।
अर्थैकनिष्ठास्ते चापि मध्यमाः श्रवणोत्सुकाः ॥ २ ॥
निःसंदिग्धं कृष्णतत्त्वं सर्वभावेन ये विदुः।
ये त्वावेशात्तु विकला निरोधाद्वा न चान्यथा ॥ ३ ॥
पूर्णभावेन पूर्णार्थाः कदाचिन्न तु सर्वदा।
अन्यासक्तास्तु ये केचिदधमाः परिकीर्तिताः ॥ ४ ॥
अनन्यमनसो मर्त्या उत्तमाः श्रवणादिषु।
देशकालद्रव्यकर्तृमंत्रकर्मप्रकारतः ॥ ५ ॥

इति श्रीवल्लभाचार्यविरचितानि पंचपद्यानि समाप्तानि।